संस्कृत-वार्ताः

05.08.2024

सायम् - 06:20

<u>मुख्यवार्ताः</u>

- बांग्लादेशे प्रचाल्यमान-छात्र-विरोधप्रदर्शनस्य मध्ये बांग्लादेशीय प्रधानमन्त्री शेखहसीना देशस्य प्रधानमन्त्रीपदात् त्यागपत्रं दत्त्वा देशं त्यक्त्वा सुरक्षितस्थानं प्रस्थितवती।
- बांग्लादेशस्य सेनाप्रमुखः घोषितवान् यत् देशस्य संचालनाय अन्तरिमसर्वकारस्य निर्माणं भविष्यति।
- राष्ट्रपतिः द्रौपदी मुर्मूः अद्य द्विदिवसीय-आधिकारिकयात्रायाः कृते फिजीदेशं प्राप्तवती।
- भारतस्य स्वास्थ्यक्षेत्रे विगतदशवर्षेषु वित्तविनियोगे चतुष्षष्ठि-अधिक-एकशतं प्रतिशतं वृद्धिः पञ्जीकृता ।
- अमेरिकादेशेन इजरायलविरुद्धं इरान्-हिजबुल-सङ्घयोः सम्भाव्यप्रतिकार-कार्याणां विषये जी-सप्त-इत्यस्य विदेशमन्त्रिभ्यः कठोरचेतावनी कृता।
- पेरिस-ओलम्पिक-क्रीडायाम्, शटल्-बेडमिण्टन् इत्यस्य पुरुष-एकल-क्रीडायां भारतस्य लक्ष्यसेनः, मलेशिया-देशस्य ज़ी जिया ली-इत्यनेन सह क्रीडति।

<u>बांग्लादेशः-त्यागपत्रम्</u>

समाचारसूत्रानुसारं प्रचाल्यमान-छात्र-विरोधप्रदर्शनस्य मध्ये बांग्लादेशीय प्रधानमन्त्री शेखहसीना देशस्य प्रधानमन्त्रीपदात् त्यागपत्रं दत्त्वा सैन्यहेलिकॉप्टर-यानेन देशं त्यक्तवती । सेनाप्रमुखः जनरल् वाकर-उज्-जमानः अद्य देशस्य संचालनाय अन्तरिमसर्वकारस्य निर्माणं भविष्यति इति घोषितवान्। बाङ्गलादेशस्य वार्ता-माध्यमेषु उक्तं यत् ढाका-नगरे प्रधानमन्त्रिणः आधिकारिकनिवासस्थाने शतशः आन्दोलनकारिणः आक्रमणं कृतवन्तः। अथ प्रधानमन्त्री हसीना "सुरक्षितस्थानं" प्रति प्रस्थितवती । दूरदर्शने राष्ट्रं सम्बोधयन् बाङ्गलादेशस्य सेनाप्रमुखः जनरल् वाकर-उज्-जमानः देशवासिनां कृते धैर्यं धारयितुं शान्तिं च स्थापयितुम् आग्रहं कृतवान्। रविवासरे आरक्षिणाम् अथ आन्दोलनकारिणां मध्ये संजात-संघर्षे प्रायः शतं जनाः मृताः, सहस्राधिकाः च वृणिताः अभवन् ।

## राष्ट्रपतिः-फिजीयात्रा

राष्ट्रपतिः द्रौपदी मुर्मूः अद्य द्विदिवसीय-आधिकारिकयात्रायाः कृते फिजीदेशं प्राप्तवती। अवधेयमस्त यत् अद्यावधि भारतस्य राष्ट्रपतेः फिजीदेशस्य इयं प्रथमा यात्रा वर्तते । फिजीदेशस्य उपप्रधानमन्त्री विलियम गवोका तथा फिजीदेशस्य भारतीय-उच्चायुक्तः पी.एस. कार्तिगेयन् च राष्ट्रपतेः भव्यं स्वागतं कृतवन्तौ ।

राष्ट्रपतिः द्रौपदी मुर्मू अगस्तमासस्य षट्-सप्तम-दिनाङ्केषु सुवा-नाडी-नगरयोः आधिकारिकसङ्गतिषु भागं ग्रहीष्यति । राष्ट्रपतिः मुर्मू फिजीदेशस्य राष्ट्रपतिना विलियम-कटोनिवेरे इत्यमुना तथा प्रधानमन्त्रिणा सिटिवेनी रबुका इत्यमुना च सह द्विपक्षीयसमागमं करिष्यति। राष्ट्रपतिः फिजी-संसदमपि सम्बोधयिष्यति । सा सुवानगरस्य गान्धीस्मारकमहाविद्यालयस्य, नादीनगरस्य श्रीशिवसुब्रमण्य-स्वामीमन्दिरस्य च दर्शनं करिष्यति। अस्याः यात्रायाः उद्देश्यम् अस्ति यत् द्वीपराष्ट्रेण सह अस्माकम् ऐतिहासिक-सम्बन्धस्य सुदृधीकरणम् ।

## प्रधानमन्त्री- जम्मू-कश्मीर

प्रधानमन्त्री श्री-नरेन्द्रमोदी उक्तवान् यत् तदीय-सर्वकारः जम्मू-कश्मीरस्य तथा लद्दाखस्य च जनानां कृते कार्यं कुर्वन् आगामी-काले तेषां आकांक्षाः अपि पूरयिष्यति । सामाजिक-सञ्चालीय-माध्यमेन श्रीमोदिना भणितं यत् गतवर्षे अद्यैव अगस्त-मासस्य पञ्चमे दिनाङ्के संसत्-सदनेन सप्तत्यधिक-त्रिशतम्, पञ्चत्रिंशत् 'अ' इति अनुच्छेदद्वयोः च निरसनस्य निर्णयः कृतः, यत् राष्ट्रस्य इतिहासे अविस्मरणीय-क्षणम् आसीत् । सः अवदत्, जम्मू-कश्मीरे, लद्दाखे च प्रगतेः समृद्धेः च नूतनयुगस्य आरम्भः आसीत् । प्रधानमन्त्रिणा उक्तं यत्, एतेषु स्थानेषु भारतस्य संविधानम्, अक्षरशः, संविधाननिर्मातृणां महापुरुषाणां महिलानां च दृष्टेः अनुरूपं कार्यान्वितम् अभवत् । सः अवदत् यत्, अनेन सह महिलानम्, युवानाम्, परिशिष्टवर्गाणाम्, आदिवासीसमुदायानां कृते सुरक्षा, गौरवः, अवसराश्च प्राप्ताः ये च विकासस्य फलात् वंचिताः आसन् । मोदी अवदत् यत्, सहैव दशकैः जम्मू-कश्मीरे आवृतं भ्रष्टाचारं स्थगितम् अपि अभवत्।

अन्यत्र, भारतस्य इलेक्ट्रॉनिक्स् निर्यातः अधुना देशस्य शीर्षत्रिषु निर्यातेषु अन्यतमः अभवत् इति प्रधानमन्त्री श्री-नरेन्द्रमोदी आनन्दं प्रकटितवान् । विद्युदीय-तथा भारतीय-प्रौद्योगिकी-मन्त्रिणः अश्विनीवैष्णवस्य सामाजिक-सञ्चालीय-सन्देशम् उद्धृत्य श्रीमोदी अवदत् यत् इलेक्ट्रॉनिक्स-क्षेत्रे भारतस्य पराक्रमः देशस्य अभिनव-युवा-शक्त्या चालितः अस्ति । सः अवदत्, भारतदेशः आगामिषु कालेषु निरन्तररूपेण एतां गतिं सुस्थापयितुं प्रतिबद्धः अस्ति।

## स्वास्थ्य-मन्त्री

केन्द्रीय-स्वास्थ्य-परिवार-कल्याणमन्त्रिणा जगत-प्रकाश-नड्डा-वर्येण उक्तं यत् मोदीसर्वकारेण स्वास्थ्यक्षेत्रे सर्वाधिक-प्राथमिकता दत्ता । लोकसभायां ऐषमः वर्षस्य स्वास्थ्य-परिवार-कल्याण-मन्त्रालयस्य नियन्त्रणाधीनस्य अनुदानस्य क्रियान्वयनस्य विषये चर्चायाः उत्तरं यच्छन् केन्द्रीयमन्त्री सूचितवान् यत् स्वास्थ्यक्षेत्रे त्रयोदश-चतुर्दशोत्तर-द्विसहस्रतमे वर्षे वित्त-विनियोगः अष्टसप्तत्यधिक-द्विशतोत्तर-त्रयस्त्रिंशत् सहस्रं कोटिरूप्यकाणि आसन् तदनु प्रकृतं वर्धित्वा अष्टपञ्चाशदधिक-नवशतोत्तर-नवति-सहस्र-कोटि-रुप्यकाणि अभवन् । अनेन सह तुलनायाम्, स्वास्थ्यक्षेत्रे वित्तविनियोगे चतुष्षष्ठि-अधिक-एकशतं प्रतिशतं वृद्धिः पञ्जीकृता ।

## केन्द्रीयपर्यावरण-वन

केन्द्रीयपर्यावरण-वन-जलवायु-परिवर्तनमन्त्री श्री भूपेन्दर-यादवः अद्य उक्तवान् यत् केन्द्रसर्वकारेण कर्णाटकस्य आदिचुनचन-गिरी, केरलस्य चूलान्नूर-जनपदं च मयूर-अभयारण्यरूपेण घोषितम् । दिल्लीनगरे मयूरस्य मृत्योः विषये प्रश्नस्य उत्तरे सः लोकसभां सूचितवान् यत् मयूराः तापघातेन मृताः न तु एवियन इन्फ्लूएन्जा इत्यनेन रोगेण । मन्त्री उक्तवान् यत्, राष्ट्रियपक्षिणः संरक्षणार्थं अनेके उपायाः क्रियन्ते तथा च मन्त्रालयेन मयूराणां प्रजनन-संरक्षणकेन्द्राणि अपि स्थापितानि सन्ति।

## श्रम-उद्योग-मन्त्रालयः

श्रम-उद्योग-मन्त्रालयेन सूचितं यत् गतमासस्य अन्ते यावत् असंघटितक्षेत्रे पञ्चाशत् लक्षाधिकाः श्रमिकाः प्रधानमन्त्री-श्रमयोगी-मान-धनयोजनायाः कृते पञ्जीकरणं कृतवन्तः। योजना अष्टादशतः चत्वारिंशत् वर्षाणां आयुवर्गस्य असंघटितक्षेत्रस्य कार्यकर्तृभ्यः वृद्धावस्थासुरक्षां प्रददाति। नवदशोत्तर-द्विसहस्रतम-वर्षस्य फेब्रुवरीमासे अस्य प्रारम्भः अभवत् । श्रम-रोजगारराज्यमन्त्री शोभा करन्दलाजे लिखितरूपेण उत्तरे उक्तवती यत् हरियाणादेशे अधिकतमं श्रमिकाणां पञ्जीकरणं कृतम् अस्ति ।

## ऋतु-विज्ञान-विभागः

भारतीय-ऋतु-विज्ञान-विभागेन अनुमानितं यत् अद्य पश्चिम-राजस्थाने अतोऽपि अतिवृष्टिः, गुजरात-महाराष्ट्रयोः अतिवृष्टिः च भविष्यति । जम्मू-कश्मीरे, उत्तरप्रदेशे, हरियाणाराज्ये, पंजाबे, तमिळुनाडुराज्ये च अतिवृष्टेः सम्भावना वर्तते । विभागेन इदमपि सूचितं यत् – उत्तर-पश्चिमभारते तथा पूर्वभारते अपि आगामी त्रि-चतुर्दिनेषु अतिवृष्टिः भविता । विभागेन उक्तम्, हिमाचलप्रदेशे, उत्तराखण्डे च अग्रिम-दिनद्वयम् अतिवृष्टिः भविष्यति ।

अमेरिकी-विदेशसचिवः

पश्चिम एशियायां वर्धमानायाः चिन्तायाः मध्ये अमेरिकी-विदेशसचिवः एण्टोनी ब्लिङ्केन् इत्यनेन इजरायलविरुद्धं इरान्-हिजबुल-सङ्घयोः सम्भाव्यप्रतिकार-कार्याणां विषये जी-सप्त-इत्यस्य विदेशमन्त्रिभ्यः कठोरचेतावनी कृता इति कथ्यते। हमास-हिजबुल-आततायी-सङ्घयोः प्रमुख-व्यक्तिनां हत्यायाः अनन्तरं एषा चेतावनी प्रकटिता वर्तते ।

क्रीडावार्तासु

पेरिस-ओलम्पिक-क्रीडायाम्, शटल्-बेडमिण्टन् इत्यस्य पुरुष-एकल-क्रीडायां भारतस्य लक्ष्यसेनः, मलेशिया-देशस्य ज़ी जिया ली-इत्यनेन सह क्रीडित्वा कांस्यपदकं विजित्य भारतस्य गणनायां चतुर्थं पदकं योजयितुं प्रयतमानः वर्तते। अनेन लक्ष्यसेनः शटल्-बेडमिण्टन्-पुरुष-एकल-क्रीडायां प्रप्रथम-पदक-विजेता भविष्यति ।

।। इति वार्ताः ।।